# श्री महालक्ष्म्यष्टकम्

नमस्तेस्तु महामाये श्रीपीठे सुरपूजिते ।
शङ्ख चक्र गदा हस्ते महालक्ष्मि नमोऽस्तु ते । १ ॥

नमस्ते गरुडारूढे कोलासुर भयङ्करि ।
सर्व पाप हरे देवि महालक्ष्मि नमोऽस्तु ते । २ ॥

सर्वज्ञे सर्व वरदे सर्व दुष्ट भयङ्करि ।
सर्व दुःख हरे देवि महालक्ष्मि नमोऽस्तु ते । ३ ॥

सिद्धि बुद्धि प्रदे देवि भुक्ति मुक्ति प्रदायिनि ।
मन्त्र मूर्ते सदा देवि महालक्ष्मि नमोऽस्तु ते । ४ ॥

आद्यन्त रहिते देवि आद्य शक्ति महेश्वरि ।
योगजे योग सम्भूते महालक्ष्मि नमोऽस्तु ते । ५ ।

स्थूल सूक्ष्म महा रौद्रे महा शक्ते महोदरे ।
महापाप हरे देवि महालक्ष्मि नमोऽस्तु ते । ६ ॥

पद्मासन स्थिते देवि परब्रह्म स्वरूपिणि ।
परमेशि जगन्मातः महालक्ष्मि नमोऽस्तु ते । ७ ॥

श्वेताम्बर धरे देवि नानालङ्का रभूषिते ।
जगत्स्थिते जगन् मातः महालक्ष्मि नमोऽस्तु ते । ८ ॥

महालक्ष्म्यष्टकं स्तोत्रं यः पठेद् भक्तिमान्नरः ।
सर्व सिद्धि मवाप्नोति राज्यं प्राप्नोति सर्वदा । ९ ॥

एककालं पठेन् नित्यं महा पाप विनाशनम् ।
द्विकालं यः पठेन् नित्यं धनधान्य समन्वितः । १० ॥

त्रिकालं यः पठेन् नित्यं महा शत्रु विनाशनम् ।
महालक्ष्मीर् भवेन् नित्यं प्रसन्ना वरदा शुभा । ११ ॥

इति श्री महालक्ष्म्यष्टकम् सम्पूर्णं ॥